# Shri Shantadurga Stotram

# શ્રીશાન્તાદુર્ગાસ્તોત્રમ્

## Document Information

Text title : Shri Shantadurga Stotram

File name : shAntAdurgAstotram.itx

Category : devii, devI, durgA

Location : doc_devii

Author : gajAnanashAstrI gAyatoNDe

Proofread by : NA

Latest update : December 13, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 13, 2020

*sanskritdocuments.org*

# શ્રીશાન્તાદુર્ગાસ્તોત્રમ્

શાન્તાદુર્ગે મહાદેવી મઙ્ગેશપ્રાણવલ્લભે ।
સરસ્વતીસ્વરૂપાસિ વિદ્યાભિક્ષાં પ્રદેહિ મે ॥ ૧॥

આદિમાયે મહામાયે શાન્તાદુર્ગે નમોઽસ્તુ તે ।
મહાલક્ષ્મીસ્ત્વમેવાસી સમ્પદ્ભિક્ષાં પ્રદેહિ મે ॥ ૨॥

જનની સર્વલોકાનાં શાન્તાદુર્ગે નમોઽસ્તુ તે ।
મઙ્ગલે સુતવાત્સલ્યે પુત્રભિક્ષાં પ્રદેહિ મે ॥ ૩॥

મહાકાલીસ્વરૂપાસી શાન્તાદુર્ગે નમોઽસ્તુ તે ।
સર્વશત્રુવિનાશેન યશોભિક્ષાં પ્રદેહિ મે ॥ ૪॥

વિઘ્નરાજસ્વરૂપા ત્વં શાન્તાદુર્ગે નમોઽસ્તુ તે ।
કાર્યસિદ્ધિસ્ત્વદાયત્તા સિદ્ધિભિક્ષાં પ્રદેહિ મે ॥ ૫॥

સૌભાગ્યદાયિની દેવી શાન્તાદુર્ગે નમોઽસ્તુ તે ।
અષ્ટસિદ્ધિસ્વરૂપાસિ ભાગ્યભિક્ષાં પ્રદેહિ મે ॥ ૬॥

આદિશક્તિસ્ત્વમેવાસી શાન્તાદુર્ગે નમોઽસ્તુ તે ।
ત્વત્પાદભક્તિપૂજાર્થં આયુર્ભિક્ષાં પ્રદેહિ મે ॥ ૭॥

પાશાઙ્કુશધરાદેવી શાન્તાદુર્ગે નમોઽસ્તુ તે ।
ત્વયા હરીહરૌ શાન્તૌ શાન્તિભિક્ષાં પ્રદેહિ મે ॥ ૮॥

કૈવલ્યવાસિની દેવી શાન્તાદુર્ગે નમોઽસ્તુ તે ।
કેવલાનન્દરૂપાસી મોક્ષભિક્ષાં પ્રદેહિ મે ॥ ૯॥

જગદમ્બ મેદાલમ્બે શાન્તાદુર્ગે નમોઽસ્તુ તે ।
સુતો ગજાનનસ્તેષાં દયાભિક્ષાં પ્રદેહિ મે ॥ ૧૦॥

ઇતિ શ્રીગજાનનશાસ્ત્રી ગાયતોણ્ડે વિરચિતં
શ્રીશાન્તાદુર્ગાસ્તોત્રં સમ્પૂર્ણમ્ ।

*Shri Shantadurga Stotram*

pdf was typeset on December 13, 2020

Please send corrections to *sanskrit@cheerful.com*